(660) "णद भाषार्थः" (X-चुरादिः-1779. सक. सेट्. उभ.)

आस्वदीयः ।

'नदत्यव्यक्तशब्दार्थे, भाषार्थे नादयेदिति ॥' (श्लो. 110) इति देवः ।

नादकः-दिका, निनादयिषकः-षिका, नादयिता-त्री, निनादयिषिता-त्री ; [A]नादयन्-न्ती, इत्यादीनि सर्वाण्यपि रूपाणि अवस्पन्दनार्थकणट (658) धातुवत् ज्ञेयानि ।

(661) "णभ हिंसायाम्" (I-भ्वादिः-752. सक. सेट्. आत्म.)

'नभ्येन्नभ्नाति नभते हिंसायां तत्तुभेः समम् ।' (श्लो. 145) इति देवः ।

'णभिरयमभावेऽपि वर्तते । 'नभन्तामन्यके समे' इत्यत्र, 'मा भूवन् अन्यके सर्वे' इति निरुक्तम् (5-23) । ' इति मा. धा. वृत्तिः ।

नाभकः-भिका, नाभकः-भिका, निनभिषकः-षिका, नानभकः-भिका ;
नभिता-त्री, नाभयिता-त्री, निनभिषिता-त्री, नानभिता-त्री ;
— नाभयन्-न्ती, नाभयिष्यन्-न्ती-ती ; —
नभमानः, [1]प्रणिनभमानः-प्रनिनभमानः, [2]प्रणभमानः, नाभयमानः, निनभिषमाणः, नानभ्यमानः ;
नभिष्यमाणः, नाभयिष्यमाणः, निनभिषिष्यमाणः, नानभिष्यमाणः ;
प्रणप्-प्रणब्-प्रणभौ-प्रणभः ; — —
नभितः-तम्, नाभितः, निनभिषितः, नानभितः-तवान् ;
नभः, नाभः, निनभिषुः, नानभः ;
नभितव्यम्, नाभयितव्यम्, निनभिषितव्यम्, नानभितव्यम् ;
नभनीयम्, नाभनीयम्, निनभिषणीयम्, नानभनीयम् ;
[3]नभ्यम्[B], नाभ्यम्, निनभिष्यम्, नानभ्यम् ;
ईषन्नभः-दुर्नभः-सुनभः ; — —

---

1. 'शेषे विभाषाऽकखादावषान्त उपदेशे' (8-4-18) इति णत्वविकल्पः ।
2. 'उपसर्गादसमासेऽपि णोपदेशस्य' (8-4-14) इति नित्यं णत्वम् ।
3. 'पोरदुपधात्' (3-1-98) इति यत् ।

A. 'अलोचि चान्यैः समरेऽत्र कष्टतामलोकयन् दुष्यति नादयन्नपि ।' धा. का. 3.45.
B. 'अनभ्यसन्तोभककंसजीवसंनाय पापध्वदयं प्रतस्थे ॥' धा. का. 2.2.